**संस्कृत वार्ता:**
**दिनाङ्क : 11.10.2026**
**सायम् : 06:20**

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री अद्य तमिलनाडु राज्ये त्रयोदश-सहस्र-कोट्यधिकरूप्यकाणां नैकासां विकास-परियोजनानां शुभारम्भम् अकरोत्। अत्रावसरे तेनोक्तं यत् इमाः परियोजनाः सम्पर्क-व्यवस्थां वृत्तेः अवसरान् च जनयिष्यन्ति।
- प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् सम्प्रति सम्पूर्ण-विश्वम् उदीयमानानां नूतनाह्वानानां निवारणाय समाधानानि अन्विष्यति। एतेषां समाधान-प्रदानाय भारतस्य युवसु पर्याप्ता प्रतिभा अस्ति।
- सर्वोच्चन्यायालयेन अधिकारिभ्यः शान्तिपूर्ण-रीत्या एकत्रितानां जनानाम् अवैध-निगडनं वारयितुं सामान्यम् आवागमनं सञ्चालितुं निर्बाध-अन्तर्जालं च सुनिश्चेतुं निर्दिष्टम्।
- नेपालस्य गोरखा जनपदे बूढ़ी गंडक नद्यां जलवृद्धि-कारणेन प्रभाविताः पञ्चाशत् जनाः समुद्धारिताः।
- **अपि च**
- भारत वेस्टइंडीज दलयोः तृतीया विंशतिं प्रति-विंशतिः स्पर्धा अद्य इंदौर नगरे आयोज्यते।

## अथ वार्ता: विस्तरेण

### प्रधानमन्त्री तमिलनाडु

प्रधानमन्त्री नरेन्द्रमोदी अद्य चेन्नइ-नगरे भारतीय-प्रौद्योगिकी-संस्थानस्य प्राङ्गणे आयोजिते भव्य-समारोहे तमिलनाडु-राज्याय त्रयोदश-सहस्रकोटिरूप्यतोऽप्यधिकानां विविधानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्। एतासु परियोजनासु मार्ग-रेल-परिवहनं, पत्तन-मूलभूत-संरचना पेट्रोलियम-क्षेत्रं अथ वैज्ञानिकानुसन्धान-प्रकल्पाः सम्मिलिताः सन्ति। अत्र सप्तशताधिक-त्रिसहस्रकोटिरूप्यकाणां राष्ट्रिय-राजमार्ग-कार्याणि, चेन्नई-पत्तन-विकास-परियोजनाः, अमृत-भारत-स्थानक-योजनायाः अन्तर्गतं रेल-स्थानकानां नवीनीकरणं च मुख्यम् अस्ति। अत्रावसरे तमिलनाडु-राज्यस्य मुख्यमन्त्री सी.जोसेफ-विजयः अपि उपस्थितः आसीत्। सभां सम्बोधयता प्रधानमन्त्रिणा अयं दिवसः ऐतिहासिकावसरत्वेन वर्णितः।

सः अवोचत् यत् एतैः पदक्रमैः सम्पर्क-व्यवस्था सुदृढा भविष्यति, उद्योग-व्यापारयोः विस्तारः सम्पत्स्यते, राज्यस्य युवभ्यश्च नूतनाः उद्यमावसराः सृज्यन्ते। जनसेवायां स्वकीययात्रां संस्मरता श्रीमोदिना उक्तं यत् सर्वकार-प्रमुखत्वेन सः पञ्चविंशति-वर्षाणि सम्पूरितवान् यतः एकाधिक-द्विसहस्रतमस्य वर्षस्य अक्टूबर-मासे गुजरात-राज्यस्य मुख्यमन्त्रित्वेन शपथ-ग्रहणात् आरभ्य प्रधानमन्त्रित्व-पर्यन्तम् इयं यात्रा अविरतं प्रचलति। सः प्रत्यपादयत् यत् भारतस्य प्रगतिः स्वकीयायाः समृद्ध-सांस्कृतिक-न्यासात्, वैज्ञानिक-उपलब्धिभ्यः, आधुनिक-मूलभूत-संरचनायाश्च शक्तिं गृह्णाति। प्रधानमन्त्रिणा आईआईटी-मद्रास-परिसरे सुधा-गोपालकृष्णन्-मस्तिष्क-केन्द्रम् अपि राष्ट्राय समर्पितम्। इदं केन्द्रम् शतसंख्याधिक-मानव-मस्तिष्कानां कोशिकीय-सूक्ष्मतायाम् त्रि-आयामीय-मानचित्रीकरणस्य युगान्तरकारि-वैज्ञानिक-प्रयासस्य भागः अस्ति, यत्र भ्रूणावस्थातः वार्धक्य-पर्यन्तं सम्पूर्ण-आयु-कालस्य अध्ययनं भविष्यति। इतः पूर्वस्मिन् दिवसे प्रधानमन्त्रिणा चेन्नई-मेट्रो-रेल-प्रकल्पस्य द्वितीय-चरणस्य पूनमल्ली-वडपलनी-मार्गखण्डः अपि लोकार्पितः, यस्य निर्माणं प्रायः नवशताधिक-चतुःसहस्र-कोटिरूप्यकैः अस्ति।

प्रधानमन्त्री नरेन्द्रमोदी अद्य चेन्नई-नगरे अवोचत् यत् सम्प्रति सम्पूर्ण-विश्वम् उदीयमानानां नूतनाह्वानानां निवारणाय समाधानानि अन्विष्यति। सः दृढ-विश्वासं प्राकटयत् यत् एतेषां समाधानानां प्रदानाय भारतस्य युवसु पर्याप्ता प्रतिभा, सामर्थ्यं सम्भावनाश्च सन्ति। अद्य सायङ्काले चेन्नई-नगरे जयगोपाल-गारोदिया-हिन्दू-विद्यालये आयोजिते स्वर्ण-जयन्ती-महोत्सवे भाषमाणः प्रधानमन्त्री एतदुक्तवान्। सः विशेषतया अवदत् यत् विकसित-भारतस्य सङ्कल्पं पूरयितुं देशस्य युवशक्तिः महत्त्वपूर्णां भूमिकां निर्वक्ष्यति।

**सर्वोच्चन्यायालयः अधिकारिणः**

सर्वोच्चन्यायालयेन शान्तिपूर्ण-रीत्या एकत्रितानां जनानाम् अवैध-निगडनं वारयितुं सामान्यम् आवागमनं सञ्चालितुं च अधिकारिणः निर्दिष्टाः। न्यायालयेन दिल्ल्यां मार्गावरोधाय बैरिकेडिंग व्यवस्थायाः समीक्षा मेट्रो सेवायाः समयानुसारं सञ्चालनं अन्तर्जालसेवा च निर्बाधरूपेण प्रवर्तयितुम् आदिष्टम्। न्यायालयेन उक्तं यत् अधिवक्तॄणां दायित्वानां निर्वहने बाधा न कर्तव्या। सर्वोच्च-न्यायालयस्य निर्देशानां कथितोल्लङ्घनाय अवमानना-कार्यचरण-सम्बद्ध- याचिकायां न्यायालयेनोक्तं यत् असौ समेषां पक्षाणां मन्तव्यं श्रोष्यति सुनिश्चितं च करिष्यति यत् कस्मै अपि असौविध्यं न भवेत्।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।**

**प्रोमो - सोशल मीडिया**

**नवरात्रमहोत्सवः**

नवदिनात्मकः नवरात्रमहोत्सवः अद्य महता उत्साहेन भक्तिभावेन च प्रारब्धः। अयं महोत्सवः दुर्गादेव्याः नवानां स्वरूपाणाम् आराधनायै समर्पितः अस्ति। शारदीयनवरात्रस्य प्रथमदिने मातुः दुर्गायाः शैलपुत्री रूपस्य अर्चना विधीयते। हिमालयतनया शैलपुत्री शक्तिं स्थैर्यं नवारम्भं च द्योतयति। श्रद्धालवः देशस्य प्रसिद्धेषु देवीमन्दिरेषु दर्शनार्थं गच्छन्ति। अत्रावसरे उपराष्ट्रपतिः सी पी राधाकृष्णनः प्रधानमन्त्री नरेन्द्रमोदी च देशवासिभ्यः नवरात्र-पर्वणः शुभकामनाः दत्तवन्तौ।

**रेलवे-नियुक्तिः**

रेलवे-चयन-परिषदा षड्विंशत्यधिक-द्विसहस्रतमस्य स्नातक-स्तरीय-नियुक्तये अधिसूचना प्रकाशिता। रेल-मन्त्रालयेन सूचितं यत् अष्टचत्वारिंशदधिक-पञ्चशतोत्तर त्रिसहस्राधिक-स्नातक-स्तरीय-पदानां कृते इयं चयन-प्रक्रिया आयोज्यते। रेल-मन्त्रालयस्य विवरणानुसारम् अस्यां नियुक्ति-प्रक्रियायां चत्वारः प्रमुख-संवर्गाः समाविष्टाः सन्ति, येषु मुख्य-वाणिज्यिक-सह-यात्रापत्र-पर्यवेक्षकः, वस्तुयान-प्रबन्धकः, कनिष्ठ-लेखा-सहायक-सह-टङ्ककः अथ च वरिष्ठ-लिपिक-सह-टङ्ककः इत्यादीनि पदानि अन्तर्भवन्ति। अस्याः प्रक्रियायाः कृते अन्तर्जाल-माध्यमेन आवेदन-ग्रहणम् अक्टूबर-मासस्य अष्टमे दिनाङ्के प्रारब्धम्, योग्याः अभ्यर्थिनः च आगामि-मासस्य षष्ठ-दिनाङ्कं यावत् स्व-आवेदन-पत्राणि प्रेषयितुं शक्नुवन्ति।

**सीजेपी-नेतारः**

गतदिने पूर्वोपाय-रूपेण निगडिताः सीजेपी-समूहस्य नेतारः अभिजीत-दीपके, आशुतोष-राङ्का सहैव सौरव-दासः इत्येते अद्य नवदिल्ल्यां विशेष-कार्यपालक-दण्डाधिकारि-न्यायालयेन विमोचिताः। दिल्ली-आरक्षि-दलेन संसूचितं यत् सर्वविधानां विहित-वैधिनिक-प्रक्रियाणां पालनानन्तरम् एते त्रयः जनाः अद्य प्रातःकाले दिल्ली-छावनी-स्थिते विशेष-कार्यपालक-दण्डाधिकारिणः समक्षं प्रस्तुताः । आरक्षि-प्रशासनेन स्पष्टीकृतं यत् एकवर्ष-पर्यन्तं शान्ति-व्यवस्थां सदाचारं च रक्षितुम् एतेभ्यः पञ्चाशत्-सहस्ररूप्यकाणां प्रतिभू-बन्धप्रपत्रं स्वीकृत्य मुक्तिः प्रदत्ता।

**आई एन एस त्रिशूलः**

भारतीयनौसेनायाः पोतः आई एन एस त्रिशूलः भारत-अमेरिकयोः द्विपक्षीयसामुद्रिकाभ्यासे 'कोङ्कन-२६' इत्यस्मिन् भागं ग्रहीतुं अमेरिका-देशस्य प्लायमाउथ्-नगरम् प्राप्तः। रक्षामन्त्रालयेन उक्तं यत् अयं अभ्यासः अमेरिकीय-नौसेनया सह क्रियते। एषः

अभ्यासः प्लायमाउथ-तटस्य समीपे द्वयोः चरणयोः गुरुवासरपर्यन्तं भविष्यति। विगतदशकद्वये कोङ्कन-अभ्यासस्य व्याप्तिः विस्तारिता, जटिलता च वर्धिता, येन उभयराष्ट्रानां नौसेनानां मध्ये अन्तरक्रियाशीलता, परस्परं च अवगमनं सुदृढं जातम्।

**रियादविमानपत्तनाक्रमणम्**

सऊदी अरब प्रशासनेन एकस्मिन् वक्तव्ये प्रोक्तं यत् रियादनगरे विमानपत्तनाक्रमणे द्वादशजना: मृता: नवोत्तर-त्रिशतं जनाश्च व्रणिता:। मृतकेषु चत्वार: सऊदी नागरिका: अष्टौ च वैदेशिका: सन्ति। मृतकेषु बांग्लादेशस्य द्वौ अमरीका, मिस्र, जॉर्डन, सीरिया, फिलिस्तीन सूडान देशानां च प्रत्येकं एक: नागरिक: सम्मिलित:। सऊदी अरबस्य नेतृत्वयुतया संयुत्या उक्तं यत् एतत् आतङ्क्याक्रमणं वर्तते। भारतेन अंतरराष्ट्रीय-विमान-पत्तने आक्रमणं निन्दितम्। जन-धनहानौ च चिन्ता प्रकटिता। मृतकानां परिजनान् प्रति संवेदना प्रकटिता। व्रणितानां च शीघ्रस्वास्थ्य कामना भारतेन कृता।

**नेपाले जलौघः**

नेपालस्य गोरखा जनपदे बुढीगण्डकीनद्याः जलस्तरे आकस्मिकवृद्धेः अनन्तरं तटवर्ति निवासिनः सुरक्षितस्थानेषु गन्तुं परामृष्टा:। जलवृद्धि-कारणेन प्रभाविताः पञ्चाशत् जनाः समुद्धारिताः। अद्य प्रातः काले जलवृद्धि कारणेन अनेकानि गृहाणि जलप्रवाहे गतानि। इदानीं यावत् क्षतिः न ज्ञाता। जलस्तरे आकस्मिकवृद्धेः कारणम् अद्यापि स्पष्टं न जातम्।

**क्रिकेट्**

भारत वेस्टइंडीज दलयो: विंशतिं प्रति-विंशति: क्रिकेट् स्पर्धामालिकायाः तृतीया क्रीड़ा अद्य इंदौर नगरे आयोज्यते। भारतीय-समयानुसारेण इयं स्पर्धा रात्रौ सप्तवादने आरप्स्यते। इतं पूर्वं दलद्वयं शृङ्खलायां साम्यत्वं सन्धत्ते।

**।। इति वार्ता: ।।**